अद्वयपरमार्थनामसङ्गीति

प्रकाशक

नेपाल परम्परागत बौद्धधर्म संघ

नकबहिल, ललितपुर

अद्वयपरमार्थनामसङ्गीति



प्रकाशक
नेपाल परम्परागत बौद्धधर्म संघ
नकबहिल, ललितपुर

वि.सं. २०७१ श्रावण ३० गते शुक्रबार

पिकाकः पाखें

नेपाल परम्परागत बौद्ध धर्म संघपाखें नेपाःया बुद्ध धर्म संस्कृति व सम्पदाया संरक्षण तथा सम्वर्द्धन याना वनेगु भ्क्वलय् थौ कन्हे यानाच्वंगु अतिक महत्वपूर्णगु छगू ज्या खः **लुम्बिनीइ नेपाल बज्रयान महाविहार निर्माण**। शाक्यमुनि बुद्ध जन्मभूमि सकल नेपामिपिनिगु नितिं श्रद्धाया भूमि खः। थुज्वगु पवित्र भूमिइ थी थी देशं थःगु हे मौलिक बौद्ध वास्तुशैली पिज्वइगु कथं विहारत दयेकल तर नेपाः देया थःगु हे पवित्र भूमि जुयानं अन नेपाःया मौलिक बौद्ध वास्तुशैली पिज्वःगु विहार मदु थ्वहे खँयात मनन यासें नेपाल परम्परागत बौद्ध धर्म संघपाखें नेपाः देयाहे प्रतिनिधित्व याइकथं नेपाल बज्रयान महाविहार निर्माण कार्य न्हयाकूगु जुल।

विहार निर्माण कार्य सरल मजू छायधाःसा थुकिया नितिं यक्व आर्थिक स्रोत माः। नेपाल बज्रयान महाविहार मुक्क नेपामिपिनिगु जूगुलिं नेपामिपिपाखें प्राप्त जूगु दानपाखें जक विहार दयेकेगु क्वछिना तयागु जुल-थ्व नेपाल बज्रयान विहारया छगू मू विशेषता खः। नेपामिपिनिगु जक ग्वहालिं विहार दयेकेगु ताःतुना तयागु जुया नेपाल परम्परागत बौद्ध धर्म संघपाखें इलय् व्यलय् दान संकलन यायेगु ज्याभ्क्वः त तया वयाच्वनागु जुल, थ्वहे भ्क्वलय् थ्वहे वइगु श्रावण ३०, ३१ गते अहोरात्र नामसंङ्गीति पाठ याकाः दान संकलन यायेगु ज्याभ्क्व तयागु जुल। थुगु अहोरात्र नामसंङ्गीति पाठ तथा दान संकलन ज्यभ्क्वया स्मरण स्वरुप थुगु नामसंङ्गीति सफूया प्रकाशन जूवंगु जुल। दान संकलन ज्याभ्क्वःस शुद्धरुपं, संस्कृत भाषा मिलेजुइक सफू पिथनेया नितिं श्रद्धय गुरुवर प्रा.डा. नरेशमान बज्राचार्यपाखें भाषा शुद्धिकरण याना विज्याःगु जुल।

नेवाः बौद्ध समाजय् तसकं लोकंह्वाःगु, त्वाःत्वालय् न्हि न्हि धैथे पाठयाइगु नामसंङ्गीति झिंखुद्ध श्लोक दुगु आर्यमायाजाल महायोग तन्त्रय् दुने च्वंगु समाधिजाल पटल पाखें लिकयातःगु खः। नामसङ्गीति शाक्यमुनि बुद्धं कना विज्याःगु मञ्जुश्री ज्ञानसत्वयागु अद्धय परमार्था ज्ञान खःधका धयातःगु खः।

नामसंङ्गीति या शाब्दिक अर्थ यायेगु भ्क्वलय् आचार्य विलास बज्रं धया तःगु दु - **गानं गीतिः सम्यग्गीतिः संगीतिः, नाम्नां संगीति नामसंगीतिरिति** अर्थात म्येयात लय् वद्धयाना हालेगु संगीति खःसा थीथी नांयात वाँलाक, संगीत तया हालेगु नामसंगीति खः। थन नां धका धाःगु मनूयागु नां मखु, मञ्जुश्री ज्ञान सत्वयागु नां खः। थुज्वःगु नां नामसंङ्गीति ग्रन्थय् ८१२ गू दु। थुकियागु मेगु शब्दं

मन्त्र पद धका नं धाइ, थ्वहे मञ्जुश्रीया नां अथवा मन्त्र पदयात संगीत तयाःहालेगु हे नामसङ्गीति खः ।

नामसङ्गीति दुने सम्बोधि अथवा सम्यक ज्ञानयात प्यथी ब्वथलातःगु दु , व थुकथं दु । **एकक्षणभि सम्बोधि, पंचाकाराभि सम्बोधि, विंशत्याकाराभि सम्बोधि, मायाजालाभि सम्बोधि ।**

थुपिं सम्बोधि ज्ञानबज्रयोग, चित्त बज्रयोग, वाक बज्रयोग व काय बज्रयोग पाखें प्राप्त याये फइगु खँ थुकि दु । बज्रयोगया माध्यमं हे अद्धय ज्ञान लाभ जुइगु नापं ज्ञानकाय जुयाच्वम्ह मञ्जुश्री ज्ञान सत्वयात लाभ याये फइ धैगु नामसंङ्गीतिइ क्यनातःगु जुल ।

थुगु सफू मुक्कं यानां २५०० प्रति प्रकाशन यानागु जुल उकि मध्ये २००० प्रति दिवंगत श्रद्धेय आजु गज़राज बज्राचार्यया नामं वसपोलया काय्पिसं प्रायोजन याना विज्याःगु जुल अथेहे ५०० प्रति नेपाल परम्परागत बौद्ध धर्म संघ कार्यसमितिया दुजः वेखारत्न शाक्यपाखे प्रायोजन याना विज्याःगु जुल । सफू पिकायेत धर्म चित्त उत्पति याना ग्वाहालि यानाविज्याःगुलि यक्वः यक्वः सुभाय विया च्वना नापं यक्व यक्व पुण्य फल प्राप्त जुइमा धका नं आशिका यानाच्वना ।

नेपाल परम्परागत बौद्ध धर्म संघ व नेपाल बज्रयान महाविहार निर्माण मूलसमितिया मंकाः ग्वसालय् अहोरात्र नामसङ्गीति वाचन तथा दान संकलन कार्यक्रम याःगु जुल, कार्यक्रम आयोजना यायेया निति श्रद्धेयगुरुवर प्रा.डा. नरेशमान बज्राचार्यया धर्माधिकारत्वय् अहोरात्र नामसङ्गीति वाचन तथा दान संकलन समिति २०७१ गठन याःगु जुल । थुगु समतिइ दुने थी थी उपसमितित गठन जुया वांलाक ज्या न्हयाका च्वंगु जुल थुकथं दान संकलन समिति व थी थी उपसमितिइ च्वना ज्या यानाच्वना विज्यापि/दिपि सकलसित नेपाल परम्परागत बौद्ध धर्म संघ पाखें यक्व यक्व सुभाय् वियाच्वना । अस्तु

माणिकरत्न (मणीश) शाक्य
उपाध्यक्ष
नेपाल परम्परागत बौद्ध धर्म संघ

निगू शब्द

नमो रत्नत्रयाय
सर्वप्रकारं जगतो हिताय

नामसंगीति पाठ व पूजा नेपाःया बौद्ध धर्मया अभिन्न अङ्ग ख । गुरूजु व जजमानपिं सकलसियां थःथःगु बाहा, बही, त्वा, ननी, चुक, छैं-छैं पतिकं नामसंगीति ब्वना वयाच्वंगु दु । मिसा- मिजं, सः-मसः, दुम्ह-मदुम्ह, थ्व जात-व जात व मेमेगु छु नं कथंया भेदभावे लिमकुसें नामसंगीति ब्वनेगु थ्व छगू नेपाःया बौद्ध धर्मया बिशेषता नं खः । नामसंगीति थुलि प्रख्यात जुयाच्वंगु दु उकिया ल्याः चा मदु । अथेहेतुं नामसंगीतिया सफू नं गुलि पिदने धुंकल उकियानं ल्या चा मदु. न्हयाको हे पिकाःसा नं गवलें नं गाः गु नं मखु थुकिया मू कारण खः झीगु बौद्ध समाजय नामसंगीतिया लोकप्रियता, ब्यापकता, ख्याति आदि आदि ।

थुजोगु नामसंगीति सफू शुद्ध रूपं छापे जुया वयाच्वंगु धाःसा म्हो हे जक दु । बुद्ध जन्म भूमि लुम्बिनीई निर्माण जुयाच्वंगु नेपाल बज्रयान महाविहार पूवंकेत हानंछक यल देशय् नेपाल परम्परागत बौद्ध धर्म संघ व वया कचा नेपाल बज्रयान महाविहार निर्माण मूल समितिया संयुक्त ग्वसालय् थुगुसिया गुंलागाया पञ्चमी व षष्ठि (२०७१ श्रावण ३० व ३१ गते) अहोरात्र (चच्छि-न्हिच्छि) (२४ घण्टा) नामसंगीति ब्वनेगु व दान संकलन यायेगु भ्वलय फयां फक्व शुद्धरूपं नामसंगीति पिथनेगु ज्या जुयाच्वंगु दु । थ्व सफूया शुद्धताया आधार नामसंगीतिया ब्याख्याकार श्रद्धेय गुरूवर दिं पं दिब्यबज्र बज्राचार्य, दिं डा. बनारसीलाल (नामसंगीतिई बिद्यवारिधि प्राप्त यःम्ह) पिसं संपादन यानापिथंगु सफू न खत ।

थुगु नामसंगीति सफू पिथनेगु विचा दयेकुपिं-विचामि, पिथनेगुलि आर्थिक ग्वाहालि यापिं दातापिं व संबन्धित सकलयात दुनुगलं निसें धन्यवाद बियाच्वना ।

अहोरात्र आर्य नामसंगीति वाचन तथा दान संकलन थें ज्यागु पुण्य कार्यस ब्वतिकाःपिं, ग्वहालियाःपिं सकलयात नं दुनुगलं धन्यवाद वियाच्वना । थुगु पुण्य नेपाल बज्रयान महाविहार निर्माण याकनं हे क्वचायेमाल लिसें सर्वसत्व प्राणीपि सकसितं सम्यक्संबोधि ज्ञानया फल लाय् माल ।

प्रा. डा. नरेशमान बज्राचार्य
अध्यक्ष
नेपाल परम्परागत बौद्ध धर्म संघ

ने.सं.११३४ गुँलागा पञ्चमी
(२०७१ श्रावण ३० गते शुक्रबार)

॥ ओं नमो रत्नत्रयाय ॥

ओं वोधिप्रणिधिः बोधिप्रस्थान वोधिपरिणामनाः

आकाशधातुपर्यन्ते स्थिता ये सर्वप्राणिनः ।
ते उत्तमनाथपदं प्राप्नुवन्त्विति विचिन्तयन्ः ॥
तेषामेव च अर्थेन शुद्धचर्या करोम्यहम ॥

ओं नमो बुद्धाय गुरवे नमो धर्माय तायिने नमः संघाय महत्तमे

विहरति कनकाद्रौ शाक्यसिंहो मुनिन्द्रोऽपरिमित सुरसंघैः सेव्यमानो जनोघैः कुवलयदलनेत्रो लक्षणैर्युक्तगात्रः समभवहिततस्थः सर्वलोके हितस्थ ॥१॥

ये देवाः सन्ति मेरौ वरकनकमये मण्डले ये च यक्षाः
पाताले ये भुजंगा स्फणिमणिकिरणैर्ध्वस्तसर्वान्धकाराः ॥
कैलाशे स्त्रीविलाशे प्रमुदितहृदया ये च विद्याधराद्याः ॥
ते मोक्षं द्वारभूतं मुनिवरवचनं श्रोतुमायान्ति सर्वे ॥२॥

आयान्ति श्रोतुकामा असुरसुरनराः सिद्धगन्धर्वनागाः
कुम्भाण्डाः किन्नरेन्द्राः गरूडहरिहराः शक्रब्रम्हादिदेवाः॥
पूजापंचोपचारैस्त्रिभूवन नमितं मेदिनी दुर्लभं यत्
भत्त्याहं वाचयामि प्रणमित शिरसा तं महायानसूत्रं॥३॥

ओँ नमो बुद्धाय ओँ नमो धर्माय ओँ नमः संघाय॥

अद्वयपरमार्थनामसङ्गीति

नमो रत्नत्रयाय

ओं नमः श्रीमहामञ्जुनाथाय

अथ वज्रधरः श्रीमान् दुर्दान्तदमकः परः ॥
त्रैलोक्यविजयी वीरो गुह्यराट् कुलिशेश्वरः ॥१॥

विबुद्धपुण्डरीकाक्षः प्रफुल्लकमलानन ॥
प्रोल्लालयन् वज्रवरं स्वकरेण मुहुर्मुहुः ॥२॥

भृकुटीतरङ्गप्रमुखैरनन्तैर्वज्रपाणिभिः ॥
दुर्दान्तदमकैवीरैवीरवीभत्सरूपिभि ॥३॥

उल्लालयद्भिःस्वकरैः प्रस्फुरद्वज्रकोटिभिः ॥
प्रज्ञोपायमहाकरूणाजगदर्थकरैः परैः ॥४॥

हृष्टतुष्टाशयैर्मुदितैः क्रोधविग्रहरूपिभिः ॥
बुद्धकृत्यकरैर्नाथैः सार्द्ध प्रणतविग्रहै ॥५॥

प्रणम्य नाथं संबुद्धं भगवन्तं तथागतम् ॥
कृताञ्जलिपुटो भूत्वा इदमाह स्थितोऽग्रतः ॥६॥

मद्धिताय ममार्थाय अनुकम्पाय मे विभो ॥
मायाजालाभिसंबोधेर्यथा लाभी भवाम्यहम् ॥७॥

अज्ञानपङ्कमग्नानां क्लेशव्याकुलचेतसाम् ॥
हिताय सर्वसत्वानामनुत्तरफलाप्तये ॥८॥

प्रकाशयतु संबुद्धो भगवान् शास्ता जगद्गुरू ॥
महासमयतत्वज्ञ इन्द्रियाशयवित्परः ॥९॥

भगवान् ज्ञानकायस्य महोष्णीषस्य गीष्पतेः ॥
मञ्जुश्रीज्ञानसत्वस्य ज्ञानमूर्तेः स्वयम्भूवः ॥१०॥

गम्भीरार्थामुदारार्था महार्थामसमां शिवाम् ॥
आदिमध्यान्तकल्याणी नामसङ्गीतिमुत्तमाम् ॥११॥

यातीतैर्भाषिता बुद्धैर्भाषिष्यन्ते ह्यनागताः ॥
प्रत्युत्पन्नाश्च संबुद्धा यां भाषन्ते पुनः पुनः ॥१२॥

मायाजाले महातन्त्रे या चास्मिन् संप्रगीयते ॥
महावज्रधरैर्हृष्टैरमेयैमन्त्रधारिभिः ॥१३॥

अहं चैनां धारयिष्याम्या निर्याणाद् दृढाशयः ॥
यथा भवाम्यहं नाथ सर्वसंबुद्धगुह्यधृक् ॥१४॥

प्रकाशयिष्ये सत्त्वानां यथाशयविशेषतः ॥
अशेषक्लेशनाशाय अशेषाज्ञानहानये ॥१५॥

एवमध्येष्य गुह्येन्द्रो वज्रपाणिस्तथागतम् ॥
कृताञ्जलिपुटो भूत्वा प्रह्वकायः स्थितोऽग्रतः॥१६॥

इति अध्येषणाज्ञानगाथाः षोड्श ॥

अथ शाक्यमुनिर्भगवान् संबुद्धो द्विपदोत्तमः ॥
निर्णमय्यायतांस्फीतां स्वजिह्वां स्वमुखाच्छुभाम् ॥१॥

स्मितं संदर्श्य लोकानामपायत्रयशोधनम् ॥
त्रिलोकाभासकरणं चतुर्मारारिशासनम् ॥२॥

त्रिलोकमापूरयन्त्या ब्राह्मया मधुरया गिरा ॥
प्रत्यभाषत गुह्येन्द्रं वज्रपाणिं महाबलम् ॥३॥

साधु वज्रधर श्रीमन् साधु ते वज्रपाणयः ॥
यस्त्वं जगद्धितार्थाय महाकरूणयान्वितः ॥४॥

महार्थां नामसङ्गीतिं पवित्रामघनाशिनीम् ॥
मञ्जुश्रीज्ञानकायस्य मत्तः श्रोतुं समुद्यतः ॥५॥

तत्साधु देशयाम्येषः अहं ते गुह्यकाधिप ॥
शृणु त्वमेकाग्रमनास्तत्साधु भगवन्निति ॥६॥

इति प्रतिवचनज्ञानगाथाः षट् ॥

अथ शाक्यमुनिर्भगवान् सकलमन्त्रकुलं महत् ॥
मन्त्रविद्याधरंकुलं ब्यवलोक्य कुलत्रयम् ॥१॥

लोकलोकोत्तरकुलं लोकालोककुलं महत् ॥
महामुद्राकुलं चाग्र्यं महोष्णीषकुलं महत् ॥२॥

इति षटकुलावलोकनज्ञानगाथाद्वे ।

इमां षण्मन्त्र राजानां संयुक्तामद्वयोदयाम् ॥
अनुत्पादधर्मिणीं गाथां भाषतेस्म गिरांपतेः ॥१॥

अआइईउऊएऐओऔअंअः स्थितो हृदि ॥
ज्ञानमूर्तिरहं बुद्धो बुद्धानां त्र्यध्ववर्तिनाम् ॥२॥

ओँ वज्रतीक्ष्णदुःखच्छेदप्रज्ञाज्ञानमूर्तये ॥
ज्ञानकायवागीश्वरअरपचनाय ते नमः ॥३॥

इति मायाजालाभिसंबोधिक्रमगाथा स्तिस्रः ।

तद्यथा भगवान् बुद्धः संबुद्धोऽकारसम्भवः ॥
अकारः सर्ववर्णाग्र्यो महार्थः परमाक्षरः ॥१॥

महाप्राणो ह्यनुत्पादो वागुदाहारवर्जितः ॥
सर्वाभिलापहेत्वग्र्यः सर्ववाक्सु प्रभास्वरः ॥२॥

महामहमहारागः सर्वसत्वरतिङ्करः ॥
महामहमहाद्वेषः सर्वक्लेशमहारिपुः ॥३॥

महामहमहामोहो मूढधीमोहसूदनः ॥
महामहमहाक्रोधो महाक्रोधरिपुर्महान् ॥४॥

महामहमहालोभः सर्वलोभनिषूदन ॥
महाकामो महासौख्यो महामोदो महारतिः ॥५॥

महारूपो महाकायो महावर्णो महावपुः ॥
महानामा महोदारो महाविपुल मण्डलः ॥६॥

महाप्रज्ञा युधधरो महाक्लेशाङ्कुशोऽग्रणी ॥
महायशा महाकीर्तिर्महाज्योतिर्महाद्युतिः ॥७॥

महामायाधरो विद्वान् महामायार्थसाधकः ॥
महामाया रतिरतो महामायेन्द्र जालिकः ॥८॥

महादान पतिः श्रेष्ठो महाशीलधरोऽग्रणी ॥
महाक्षान्तिधरो धीरो महावीर्यपराक्रमः ॥९॥

महाध्यानसमाधिष्ठो महाप्रज्ञाशरीरधृक् ॥
महाबलो महोपायः प्रणिधिर्ज्ञानसागरः ॥१०॥

महामैत्रीमयोऽमेयो महाकारूणिकोऽग्रधीः ॥
महाप्रज्ञा महाधीमान् महोपायो महाकृति ॥११॥

महाऋद्धि बलोपेतो महावेगो महाजवः ॥
महर्द्धिको महेशाख्यो महाबलपराक्रमः ॥१२॥

महाभवाद्रिसंभेत्ता महाबज्रधरो घनः ॥
महाक्रुरो महारौद्रो महाभयभयङ्करः ॥१३॥

महाविद्योत्तमोनाथो महामन्त्रोत्तमो गुरु ॥
महायाननयारूढो महायाननयोत्तम ॥१४॥

इति वज्रधातुमण्डलज्ञानगाथा श्चतुर्दशः ।

महावैरोचनो बुद्धो महामौनी महामुनिः ॥
महामन्त्रनयोद्भूतो महामन्त्रनयात्मकः ॥१॥

दशपारमिताप्राप्तो दशपारमिताश्रयः ॥
दशपारमिताशुद्धिर्दशपारमितानयः ॥२॥

दशभूमीश्वरो नाथो दशभूमिप्रतिष्ठितः ॥
दशज्ञानविशुद्धात्मा दशज्ञानविशुद्धधृक् ॥३॥

दशाकारो दशार्थार्थो मुनीन्द्रो दशबलो विभुः ॥
अशेषविश्वार्थकरो दशाकारवशी महान् ॥४॥

अनादिर्निष्प्रपञ्चात्मा शुद्धात्मा तथतात्मकः ॥
भूतवादी यथावादि तथाकारी अनन्यवाक् ॥५॥

अद्वयो द्वयवादी च भूतकोटिव्यवस्थितः ॥
नैरात्म्यसिंहनिर्णादी कुतीर्थमृगभीकरः ॥६॥

सर्वत्रगोऽमोघगतिस्तथागतमनोजवः ॥
जिनो जितारिर्विजयी चक्रवर्ती महाबलः ॥७॥

गणमुख्यो गणचार्यो गणेशो गणपतिर्वशी ॥
महानुभावो धौरेयोऽनन्यनेयो महानयः ॥८॥

वागीशो वाक्पतिर्वाग्मी वाचस्पतिरनन्तगीः ॥
सत्यवाक् सत्यवादी च चतुःसत्योपदेशकः ॥९॥

अवैवर्त्तिको ह्यनागामी खड्गः प्रत्येकनायकः ॥
नानानिर्याणनिर्यातो महाभूतैककारणः ॥१०॥

अर्हन् क्षीणाश्रवो भिक्षुर्वीतरागो जितेन्द्रियः ॥
क्षेमाप्राप्तोऽभयप्राप्तः शीतीभूतो ह्यनाविलः ॥११॥

विद्याचरणसंपन्नः सुगतो लोकवित्परः ॥
निर्ममो निरहङ्कारः सत्यद्वयनयस्थितः ॥१२॥

संसारपारकोटिष्ठः कृतकृत्यः स्थलस्थितः ॥
कैवल्यज्ञाननिष्ठचूतः प्रज्ञाशास्त्रो विदारणः ॥१३॥

सद्धर्म्मो धर्मराड् भास्वान् लोकालोककरःपरः ॥
धर्मेश्वरो धर्मराजः श्रेयोमार्गोपदेशकः ॥१४॥

सिद्धार्थः सिद्धसंकल्पः सर्वसंकल्पवर्जितः ॥
निर्विकल्पोऽक्षयो धातुर्धर्मधातुः परोऽव्ययः ॥१५॥

पुण्यवान् पुण्यसंभारो ज्ञानं ज्ञानान्तरं महत् ॥
ज्ञानवान् सदसज्ज्ञानी संभारद्वयसंभृतः ॥१६॥

शाश्वतो विश्वराड्योगी ध्यानं धेयो धियांपतिः ॥
प्रत्यात्मवेद्यो ह्यचलः परमाद्य स्त्रिकायधृक् ॥१७॥

पञ्चकायात्मको बुद्धः पञ्चज्ञानात्मको विभुः ॥
पञ्चबुद्धात्ममुकुटः पञ्चचक्षुरसङ्गधृक् ॥१८॥

जनकः सर्वबुद्धानां बुद्धपुत्रः परो वरः ॥
प्रज्ञाभवोद्भवो योनि धर्मयोनिर्भवान्तकृत् ॥१९॥

घनैकसारो वज्रात्मा सद्योजातो जगत्पतिः ॥
गगनोद्भवः स्वयम्भूः प्रज्ञाज्ञाननलो महान् ॥२०॥

वैरोचनो महादीप्तिर्ज्ञानज्योति विरोचनः ॥
जगत्प्रदीपो ज्ञानोल्को महातेजाः प्रभास्वरः ॥२१॥

विद्याराजोऽग्रमन्त्रेशो मन्त्रराजो महार्थकृत् ॥
महोष्णीषोऽद्भुतोष्णीषो विश्वदर्शी वियत्पतिः ॥२२॥

सर्वबुद्धात्मभावाग्र्यो जगदानन्दलोचनः ॥
विश्वरूपो विधाता च पूज्यो मान्यो महाऋषिः ॥२३॥

कुलत्रयधरो मन्त्री महासमयमन्त्रधृक् ॥
रत्नत्रयधरः श्रेष्ठस्त्रियानोत्तमदेशकः ॥२४॥

अमोघपाशो विजयी वज्रपाशो महाग्रहः ॥
वज्राङ्कुशो महापाश बज्रभैरवभीकरः ॥२५॥

इति सुविशुद्धधर्मधातुज्ञानगाथाः पादोनपञ्चविंशतिः ॥

क्रोधराट् षण्मुखो भीमः षट्णेत्रः षट्भुजो बली ॥
दंष्ट्राकरालः कङ्कालो हलाहलः शताननः ॥१॥

यमान्तको विघ्नराजो वज्रवेगो भयङ्करः ॥
विघुष्टवज्रो हृद्वज्रो मायावज्रो महोदरः ॥२॥

कुलिशेशो वज्रयोनिर्वज्रमण्डो नभोपमः ॥
अचलैकजटाटोपी गजचर्मपटार्द्रधृक् ॥३॥

हाहाकारो महाघोरो हीहीकारो भयानकः ॥
अट्टहासो महाहासो वज्रहासो महारवः ॥४॥

वज्रसत्वो महासत्वो वज्रराजो महासुखः ॥
वज्रचण्डो महामोदो वज्रहूँकारहूँकृतिः ॥५॥

वज्रवाणा युधधरो वज्रखड्गो निकृन्तनः ॥
विश्ववज्रधरो वज्री एकवज्री रणंजहः ॥६॥

वज्रज्वालाकरालाक्षो वज्रज्वालाशिरोरूहः ॥
वज्रवेशो महावेशः शताक्षो वज्रलोचनः ॥७॥

वज्ररोमाङ्कुरतनुर्वज्ररोमैकविग्रहः ॥
वज्रकोटीनखारम्भो वज्रसारघनच्छविः ॥८॥

वज्रमालाधरः श्रीमान् वज्राभरणभूषितः ॥
हाहाट्टहासो निर्घोषो वज्रघोषः षडक्षर ॥९॥

मञ्जुघोषो महानाद स्त्रैलोक्यैकरवो महान् ॥
आकाशधातुपर्य्यन्त घोषो घोषवतांवर ॥१०॥

इत्यादर्शज्ञानगाथाः पादेन सार्धं दश ।

तथताभूतनैरात्म्यभूतकोटिरनक्षरः ॥
शून्यतावादि बृषभो गम्भीरोदारगर्जनः ॥१॥

धर्मशंखो महाशब्दो धर्मगण्डी महारणः ॥
अप्रतिष्ठितनिर्वाणो दशदिग्धर्म दुन्दुभिः ॥२॥

अरूपो रूपवानग्र्यो नानारूपो मनोमयः ॥
सर्वरूपावभासश्रीरशेषप्रर्तिविम्बधृक् ॥३॥

अपधृष्यो महेशाख्यस्त्रैधातुकमहेश्वरः ॥
समुच्छितार्य्यमार्गस्थो धर्म्मकेतुर्महोदयः ॥४॥

त्रैलोक्यैककुमाराङ्गः स्थविरो वृद्धः प्रजापति ॥
द्वात्रिंशल्लक्षणधरः कान्तस्त्रैलोक्यसुन्दरः ॥५॥

लोकज्ञानगुणचार्य्यो लोकाचार्यो विशारदः ॥
नाथस्त्राता त्रिलोकाप्तः शरणन्ताय्यनुत्तरः ॥६॥

गगनाभोगसम्भोगः सर्वज्ञज्ञानसागरः ॥
अविद्याण्डकोशभेत्ता भवपञ्जरदारणः ॥७॥

शमिताशेष संक्लेशः संसारार्णवपारगः ॥
ज्ञानाभिषेकमुकुटः संम्यक्संबुद्धभूषणः ॥८॥

त्रिदुःखदुःखशमनस्त्र्यन्तोऽनन्तस्त्रिमुक्तिगः ॥
सर्वावरणनिर्मुक्त आकाश समताङ्गतः ॥९॥

सर्वक्लेशमलातीत स्त्र्यध्वानध्वगतिंगतः ॥
सर्वसत्वमहानागो गुणशेखरशेखरः ॥१०॥

सर्वोपधिविनिर्मुक्तो व्योमवर्त्मनि सुस्थितः ॥
महाचिन्तामणिधरः सर्वरत्नतमो बिभुः ॥११॥

महाकल्पतरूःस्फीतो महाभद्रघटोत्तमः ॥
सर्वसत्वार्थकृत्कर्ता हितैषी सत्ववत्सलः ॥१२॥

शुभाशुभज्ञः कालज्ञः समयज्ञः समयी विभुः ॥
सत्वेन्द्रियज्ञो वेलज्ञो विमुक्तित्रय कोविदः ॥१३॥

गुणी गुणज्ञो धर्मज्ञः प्रशस्तो मङ्गलोदयः ॥
सर्वमङ्गल माङ्गल्यः कीर्ति लक्ष्मीर्यशः शुभः ॥१४॥

महोत्सवो महाश्वासो महानन्दो महारतिः ॥
सत्कारः सत्कृतिर्भूतिः प्रमोदः श्रीयशस्पतिः ॥१५॥

वरण्यो वरदः श्रेष्ठः शरण्यः शरणोत्तमः ॥
महाभयारिः प्रवरो निःशेष भयनाशनः ॥१६॥

शिखी शिखण्डी जटिलो जटी मौण्डी किरीटिमान्॥
पञ्चाननः पञ्चशिखः पञ्चचीरकशेखरः ॥१७॥

महाव्रतधरो मौञ्जी ब्रम्हचारी व्रतोत्तमः ॥
महातपास्तपो निष्ठः स्नातको गौतमोऽग्रणी ॥१८॥

ब्रम्हविद् ब्राम्हणो ब्रम्हा ब्रम्हनिर्वाणमाप्तवान् ॥
मुक्तिर्मोक्षो विमोक्षाङ्गो विमुक्तिः शान्तता शिवः॥१९॥

निर्वाणो निर्वृतिः शान्तिः श्रेयोनिर्याणमन्तगः ॥
सुखदुःखान्तकृन्निष्ठा वैराग्यमुपधिक्षयः ॥२०॥

अजय्यो ऽनुपमो ऽव्यक्तो निराभासो निरञ्जनः ॥
निष्कलःसर्वगो व्यापी सूक्ष्मो वीजमना श्रवः ॥२१॥

अरजो विरजो विमलो वान्तदोषो निरामयोः ॥
सुप्रबुद्धो विबुद्धात्मा सर्वज्ञः सर्ववित्परः ॥२२॥

विज्ञानधर्मतातीतो ज्ञानमद्वयरूपधृक् ॥
निर्विकल्पो निराभोग स्त्र्यध्व संबुद्ध कार्यकृत्॥२३॥

अनादिनिधनो बुद्ध आदिबुद्धो निरन्वयः ॥
ज्ञानैकचक्षुरमलो ज्ञानमूर्तिस्तथागतः ॥२४॥

वागीश्वरो महावादी वादीराट् वादिपुङ्गवः ॥
वदताम्वरो वरिष्ठो वादिसिंहोऽपराजितः ॥२५॥

समन्तदर्शी प्रामोद्यस्तेजोमाली सुदर्शनः ॥
श्रीवत्सः सुप्रभो दीप्तिर्भाभासुरकरद्युर्तिः ॥२६॥

महाभिषम्वरः श्रेष्ठः शल्यहर्त्ता निरूत्तरः ॥
अशेषभैषज्यतरूः क्लेशव्याधिर्महारिपुः ॥२७॥

त्रैलोक्यतिलकः कान्तः श्रीमान् नक्षत्रमण्डलः ॥
दशदिग्व्योमपर्य्यन्तो धर्मध्वजमहोच्छ्रयः ॥२८॥

जगच्छत्रैकविपुलो मैत्रीकरुणमण्डलः ॥
पद्मनृत्येश्वर श्रीमान् रत्नच्छत्रो महाविभुः ॥२९॥

सर्वबुद्धमहाराजः सर्वबुद्धात्मभावधृक् ॥
सर्वबुद्धमहायोगः सर्वबुद्धैकशासनः ॥३०॥

वज्ररत्नाभिषेकश्रीः सर्वरत्नाधिपेश्वरः ॥
सर्वलोकेश्वरपतिः सर्ववज्रधरा धिपः ॥३१॥

सर्वबुद्धमहाचित्तः सर्वबुद्धमनोगतिः ॥
सर्वबुद्धमहाकायः सर्वबुद्धसरस्वती ॥३२॥

वज्रसूर्य्यमहालोको वज्रेन्दुविमलप्रभः ॥
विरागादिमहारागो विश्ववर्णोज्वलप्रभः ॥३३॥

सम्बुद्धवज्रपर्यङ्को बुद्धसङ्गीतिधर्मधृक् ॥
बुद्धपद्मोद्भवः श्रीमान् सर्वज्ञज्ञानकोषधृक् ॥३४॥

विश्वमायाधरो राजा बुद्धविद्याधरो महान् ॥
वज्रतीक्ष्णो महाखड्गो विशुद्धः परमाक्षरः ॥३५॥

दुःखच्छेदमहायान वज्रधर्ममहायुधः ॥
जिनजिग् वज्रगाम्भीर्य्यो वज्रबुद्धिर्यथार्थवित् ॥३६॥

सर्वपारमितापूरी सर्वभूमिविभूषणः ॥
विशुद्धधर्मनैरात्म्यः सम्यग्ज्ञानेन्दुहृत्प्रभः ॥३७॥

मायाजालमहोद्योगः सर्वतन्त्राधिपः परः ॥
अशेषवज्रपर्यङ्को निःशेषज्ञानकाय धृक् ॥३८॥

समन्तभद्रः सुमतिः क्षितिगर्भो जगद्धतिः ॥
सर्वबुद्धमहागर्भो विश्वनिर्माणचक्रधृक् ॥३९॥

सर्वभावस्वभावाग्र्यः सर्वभावस्वभावधृक् ॥
अनुत्पादधर्मविश्वार्थः सर्वधर्मस्वभावधृक् ॥४०॥

एकक्षणमहाप्राज्ञः सर्वधर्मावबोधधृक् ॥
सर्वधर्माभिसमयो भूतान्तमुनिरग्रधीः ॥४१॥

स्तिमितः सुप्रसन्नात्मा सम्यक्संबुद्धबोधिधृक् ॥
प्रत्यक्षः सर्वबुद्धानां ज्ञानार्चिः सुप्रभास्वर ॥४२॥

इति प्रत्यबेक्षणाज्ञानगाथाः द्वाचत्त्वारिंशत् ॥

इष्टार्थसाधकः परः सर्वापायविशोधकः ॥
सर्वसत्वोत्तमो नाथः सर्वसत्वप्रमोचकः ॥१॥

क्लेशसंग्रामशूरैकः अज्ञानरिपुदर्पहा ॥
धीश्रृङ्गारधरः श्रीमान् बीरबीभत्सरूपधृक् ॥२॥

बाहुदण्डशताक्षेपपदनिक्षेपनर्त्तनः ॥
श्रीमच्छतभुजाभोगगगनाभोगनर्त्तनः ॥३॥

एकपादतलाक्रान्तमहीमण्डतलेस्थितः ॥
ब्रम्हाण्डशिखराक्रान्तपादाङ्गुष्ठनखे स्थितः ॥४॥

एकार्थोऽद्वयधर्मार्थः परमार्थोऽविनश्वरः ॥
नानाविज्ञप्तिरूपार्थश्चित्तविज्ञानसंततिः ॥५॥

अशेषभावार्थरतिः शून्यतारतिरग्रधीः ॥
भवरागाद्यतीतश्च भवत्रयमहारतिः ॥६॥

शुद्धशुभ्राभ्रधवलः शरच्चन्द्रांशुसुप्रभः ॥
बालार्क्कमण्डलच्छायो महारागनखप्रभः ॥७॥

इन्द्रनीलाग्रसच्चीरो महानीलकचाग्रधृक् ॥
महामणिमयूखश्रीर्बुद्धनिर्वाणभूषणः ॥८॥

लोकधातुशताकम्पीऋद्धिपादपराक्रमः ॥
महास्मृतिधररतत्वश्चतुस्मृतिसमाधिराट् ॥९॥

बोध्यङ्गकुसुमामोदस्तथागतगुणोदधिः ॥
अष्टाङ्गमार्गनयवित् सम्यक्संबुद्धमार्गवित् ॥१०॥

सर्वसत्वमहासङ्गो निसङ्गोगगनोपमः ॥
सर्वसत्वमनोजातः सर्वसत्वमनोजवः ॥११॥

सर्वसत्वेन्द्रियार्थज्ञः सर्वसत्वमनोहरः ॥
पञ्चस्कन्धार्थतत्वज्ञः पञ्चस्कन्धविशुद्धधृक् ॥१२॥

सर्वनिर्वाणकोटिष्ठः सर्वनिर्वाणकोविदः ॥
सर्वनिर्वाणमार्गस्थः सर्वनिर्वाणदेशकः ॥१३॥

द्वादशाङ्गभवोत्खातो द्वादशाकारशुद्धधृक् ॥
चतुःसत्यनयाकारः अष्टज्ञानावबोधधृक् ॥१४॥

द्वादशाकारसत्यार्थः षोडशाकारतत्ववित् ॥
विंशत्याकारसंबोधि र्विबुद्धः सर्ववित्परः ॥१५॥

अमेयबुद्धनिर्माणकायकोटिविभावकः ॥
सर्वक्षणाभिसमयः सर्वचित्तक्षणार्थवित् ॥१६॥

नानायाननयोपाय जगदर्थर्विभावकः ॥
यानत्रितयनिर्यातः एकयानफलेस्थितः ॥१७॥

क्लेशधातुविशुद्धात्मा कर्मधातुक्षयङ्करः ॥
ओघोदधिसमुत्तीर्णो योगकान्तारनिःसृतः ॥१८॥

क्लेशोपक्लेशसंक्लेशसुप्रहीनसवासनः ॥
प्रज्ञोपायमहाकरूणा अमोघजगदर्थकृत ॥१९॥

सर्वसंज्ञाप्रहीणार्थो विज्ञानार्थो निरोधधृक् ॥
सर्वसत्वमनोविषयः सर्वबुद्धमनोगतिः ॥२०॥

सर्वसत्वमनोन्तस्थः स्तच्चित समताङ्गतः ॥
सर्वसत्वमनोल्हादी सर्वसत्वमनोरतिः ॥२१॥

सिद्धान्त विभ्रमापेतः सर्वभ्रान्ति विवर्जितः ॥
निःसंदिग्धमतिस्त्र्यर्थः सर्वार्थस्त्रिगुणात्मकः ॥२२॥

पञ्चस्कन्धार्थत्रिकालः सर्वक्षणबिभावकः ॥
एकक्षणभिसंबुद्धः सर्वबुद्धस्वभावधृक् ॥२३॥

अनङ्गकायः कायाग्र्यः कायकोटिविभावकः ॥
अशेषरूपसन्दर्शी रत्नकेतुर्महामुनि ॥२४॥

इति समताज्ञानगाथा चतुर्विंशतिः ।

सर्वसंबुद्धबोधव्यो बुद्धबोधिरनुत्तरः ॥
अनक्षरो मन्त्रयोनिर्महामन्त्रकुलत्रयः ॥१॥

सर्वमन्त्रार्थजनको महाविन्दुरनक्षरः ॥
पञ्चाक्षरो महाशून्यो बिन्दुशून्यः षडक्षरः ॥२॥

सर्वाकारनिराकारः षोडशार्द्धार्द्धविन्दुधृक् ॥
अकलकलनातीतश्चतुर्थध्यान कोटिधृक् ॥३॥

सर्वध्यानकलाभिज्ञः समाधिकुलगोत्रधृक् ॥
समाधिकायः कायाग्र्यः सर्वसंभोगकायराट् ॥४॥

निर्माणकायः कायाग्र्यो बुद्धनिर्माणवंशधृक् ॥
दशदिग्विश्वनिर्माणो यथावज्जगदर्थकृत् ॥५॥

देवातिदेवो देवेद्रो ऽसुरेन्द्रो दानवाधिपः ॥
अमरेन्द्रः सुरगुरू प्रमथः प्रमथेश्वरः ॥६॥

उत्तीर्णभवकान्तार एकः शास्ता जगत्गुरू ॥
प्रख्यातदशदिग्लोकधर्मदानपतिर्महान् ॥७॥

मैत्रीसन्नाहसन्नद्धः करूणावर्मवर्मितः ॥
प्रज्ञाखड्गधनुर्वाणः क्लेशाज्ञानरणञ्जहः ॥८॥

मारारिर्मारजिद्वीरश्चतुर्मारभयान्कृत् ॥
सर्वमारचमूजेता सम्बुद्धो लोकनायकः ॥९॥

वन्द्यःपूज्यो ऽभिवाद्यश्च माननीयश्च नित्यशः ॥
अर्चनीयतमो मान्यो नमस्यः परमो गुरू ॥१०॥

त्रैलोक्यैक क्रमगतिर्ब्योमपर्य्यन्तविक्रमः ॥
त्रैविद्यः श्रोत्रियः पूतः षडभिज्ञः षडनुस्मृति ॥११॥

बोधिसत्वो महासत्वो लोकातीतो महर्द्धिकः ॥
प्रज्ञापारमितानिष्ठः प्रज्ञातत्वत्वमागतः ॥१२॥

आत्मवित्परवित्सर्वः सर्वीयो ह्यग्रपुद्गलः ॥
सर्वोपमामतिक्रान्तो ज्ञेयो ज्ञानाधिपः पर ॥१३॥

धर्म्मदानपतिः श्रेष्ठश्चतुर्मुद्रार्थदेशकः ॥
पर्युपास्वतमो जगतां निर्याणत्रययायिनाम् ॥१४॥

परमार्थविशुद्धश्रीस्तैलोक्यसुभगो महान् ॥
सर्वसम्पत्करः श्रीमान् मञ्जुश्रीः श्रीमतांवरः ॥१५॥

इति कृत्यानुष्ठानज्ञानगाथाः पञ्चदश ।

नमस्ते वरदवज्राग्र्य भूतकोटे नमोस्तु ते ॥
नमस्ते शून्यतागर्भ बुद्धबोधे नमोस्तु ते ॥१॥

बुद्धराग नमस्तेऽस्तु बुद्धकाय नमो नमः ॥
बुद्धप्रीते नमस्तुभ्यं बुद्धमोद नमो नमः ॥२॥

बुद्धस्मित नमस्तुभ्यं बुद्धहास नमो नमः ॥
बुद्धवाचो नमस्तुभ्यं बुद्धभाव नमो नमः ॥३॥

अभवोद्भव नमस्तुभ्यं नमस्ते बुद्धसंभव ॥
गगन्नोद्भव नमस्तुभ्यं नमस्ते ज्ञानसंभव ॥४॥

मायाजाल नमस्तुभ्यं नमस्ते बुद्धनाटकः ॥
नमस्ते सर्वसर्वेभ्यो ज्ञानकाय नमस्तु ते ॥५॥

इतिं पंचतथागतस्तुतिज्ञानगाथाः पञ्च ।

ओं सर्वधर्माभावस्वभावविशुद्धवज्र अ आ अं अः प्रकृतिपरिशुद्धाः सर्वधर्म्माः यदुत सर्वतथागतज्ञानकायस्य मञ्जुश्री परिशुद्धितामुपादायेति ॥

अआ सर्वतथागत हृदय हर हर आँ हुँ ह्रीँ भगवन् ज्ञानमूर्ति वागीश्वरमहावाचः सर्वधर्मगगनामलसुपरि शुद्धिधर्मधातुज्ञानगर्भ आः ॥

(इति मन्त्र विन्यासः)

अथ वज्रधरः श्रीमान् हृष्टतुष्टः कृताञ्जलिः ॥
प्रणम्य नाथं संबुद्धं भगवन्तं तथागतम् ॥१॥
अन्यैश्च वहुभिर्नाथै र्गुह्येन्द्रैर्वज्रपाणिभिः ॥
स सार्द्धं क्रोधराजानैः प्रोवाचोच्चैरिदं वचः ॥२॥
अनुमोदामहे नाथ साधु साधु सुभाषितम् ॥
कृतोऽस्माकं महानार्थः सम्यक्संबोधि प्रापकः ॥३॥
जगतश्चाप्य नाथस्य विमुक्तिफलकाङ्क्षिणः ॥
श्रेयोमार्गो विशुद्धोऽयं मायाजालनयोदितः ॥४॥
गम्भीरोदारवैपुल्यो महार्थोजगदर्थकृत् ॥
बुद्धानां विषयो ह्येष सम्यक्संबुद्धभाषितः ॥५॥

॥ इति उपसंहारगाथा पञ्च ॥

आर्य्यमायाजाल षोडश साहस्रिकात् महायोगतंत्रान्तपातिसमाधिजालपटलात् भगवता श्रीशाक्यमुनिना भाषिता भगवतो मञ्जुश्री ज्ञानसत्वस्याद्वयपरमार्थानामसङ्गीतिःपरिसमाप्ता॥॥

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतः
ह्यवदत्तेषाञ्च यो निरोध एवंवादी महाश्रमणः ॥

ओं वज्रसत्त्वसमयमनुपालय वज्रसत्त्वत्वेनो
पतिष्ठ दृढो मेभव सुतोष्यो मेभव सुपोष्यो मेभव
अनुरक्तो मेभव सर्व सिद्धि मे प्रयच्छ सर्वकर्मसुच मे
चित्त श्रियं कुरू हुँ हहहह होः भगवन् सर्व तथागत
वज्रमामे मुञ्च वज्री भव महासमय सत्त्व आः ॥ ॥

योऽसौ धर्म सुगतगदितं पठ्यते भक्तिभावैः
मात्राहीनं कथमपि पदं पादागाथाक्षरं वा ॥
जिह्वादोषैः पवनचरितैः श्लेष्मदोषंप्रचारैः
यूयं बुद्धाः स्वभुवनगता बोधिसत्त्वाःक्षमध्वं ॥

थुगु नामसङ्गीति सफू ५०० प्रति नेपाल परम्परागतँ बौद्ध धर्म संघ केन्द्रीय कार्य समितिया दुजः **श्री बेखारत्न शाक्य**, सिन्चाहिति यलपाखेँ प्रायोजनयाना विज्याःगु जुल ।

अहोरात्र नामसङ्गीति पाठ तथा दान संकलन समिति २०७१

धर्माधिकारी
श्रद्धेय गुरु प्रा.डा. नरेशमान बज्राचार्य

संयोजक
श्री शंखरत्न बज्राचार्य

सह-संयोजक
श्री नेमवीर शाक्य

सचिव
श्री दिनेश शाक्य

सह- सचिव
श्री ज्ञान बहादुर शाक्य

उप-समितिका संयोजक तथा सह-संयोजकहरु

नामसंगीति वाचन
श्री चित्रवीर बज्राचार्य/श्री ज्ञानरत्न शाक्य (वा)

पूजा
श्री सुरेश बज्राचार्य/श्री अनुपवीर बज्राचार्य

दान संकलन
श्री तुलारत्न बज्राचाय/श्री प्रेमरत्न शाक्य

नाम संगीति व्यवस्थापन
श्री खेमराज शाक्य/श्री ईश्वर भाइ बज्राचार्य

आर्थिक
श्री छत्रराज बज्राचार्य/श्री बेखारत्न शाक्य

खाद्य
श्री लोकबज्र बज्राचार्य/श्री शुक्रराज शाक्य

प्रचार प्रसार
श्री बिरेन्द्र बज्राचार्य, श्री राजेश शाक्य

स्वयं सेवक
श्री शंखरत्न बज्राचार्य/श्री ज्ञानकुमार शाक्य

मञ्च श्रृङ्गार
श्री प्रेम बहादुर शाक्य/श्री सुरेन्द्र शाक्य

हलंज्वल प्रदर्शनी
श्री मदन शाक्य/श्री बिबिन्द्र बज्राचार्य

फोटो प्रदर्शनी
श्री विजयज्योति शाक्य/श्री लक्ष्मी शोभा शाक्य

महिला
श्री मिना शाक्य/श्री निर्मला शाक्य/श्री सपना बज्राचार्य

सदस्यहरु
माणिकरत्न (मणिश) शाक्य
श्री बाबुकाजि शाक्य
श्री चैत्यराज शाक्य
श्री सुगतराज बज्राचार्य
श्री मोहनरत्न शाक्य
श्री धर्मरत्न शाक्य
श्री रत्नबहादुर बज्राचार्य
श्री डा. लक्ष्मीलाल डंगोल
श्री न्हुच्चेमान तण्डुकार
श्री रत्नबहादुर तण्डुकार
श्री कृष्णवीर महर्जन
श्री हिसी शाक्य
श्री नानिमयजु बज्राचार्य
श्री दारकेशरी बज्राचार्य
श्री जमुना शाक्य
श्री रेणु शाक्य
श्री देवकुमारी बज्राचार्य
श्री दिलशोभा बज्राचार्य
श्री लक्ष्मी बज्राचार्य
श्री धनलक्ष्मी बज्राचार्य
श्री शुभद्रा शाक्य
श्री रामेश्वरी तण्डुकार
श्री नानिमाया महर्जन
श्री दर्गा महर्जन
श्री आशामाय महर्जन
श्री सक्वः महर्जन
श्री कर्णमाया महर्जन
श्री अष्टमाय महर्जन
श्री पूणमाया महर्जन
श्री पूर्णदेवी बज्राचार्य
श्री नानि डंगोल

A453

मच्छिन्द्र प्रिन्टिङ्ग प्रेस
इखाछें आनन्दबहाल, ललितपुर
फोनः ०१-५५३४५०८
ईमेल : machc_sangha@yahoo.com